तदर्थमनुष्ठानं वृथा । तत्रोत्तरं - मोक्षो हि बन्धपूर्वकः । स शुद्धनिश्चये नाऽस्त्यतो मोक्षोऽप्यात्मनो नाऽस्ति । यदा शुद्धनिश्चयेन बन्धः, तदा सर्वदैव बन्ध एव ॥" - ६९(६८) गाथा ।

"छद्मस्थानां सत्तावलोकनदर्शनपूर्वकं ज्ञानं भवति तत्र दर्शनचतुष्टयमध्ये द्वितीयं यदचक्षुर्दर्शनं मानसरूपं निर्विकल्पं भव्यस्यैव मोहस्य चारित्रस्य क्षये क्षयोपशमोपशमलाभे सति शुद्धात्मानुभूतिरूपं वीतरागसम्यक्त्वं शुद्धात्मानुभूति-ध्यानेन सहकारिकारणं भवति भव्यस्यैव, न त्वभव्यस्य, निश्चयसम्यक्त्वचारित्रा भावात् ॥" - ६१(?) गाथा

"चित्ते बद्धे बद्धो, मुक्के मुक्को त्ति नत्थि संदेहो ।
अप्पा विमलसहावो, मयलिज्जइ मयलए चित्ते ॥" - ६५(?) गाथा

अथ **केचन** वदन्ति - यदात्माऽशुद्धत्वेन परिणमतीत्युल्लेखेन कथं नाऽऽत्मनोऽशुद्धपरिणामोऽप्यात्मस्वभाव इति । तन्न, स्वभावस्य पर्यायः परिणामो न भवति । यदुक्तं **भगवत्यां** १२ शते उद्दे० २ - "भवसिद्धियत्तणं भंते! जीवाणं किं सभावओ परिणामओ ? जयंती! सभावओ न परिणामओ ॥" एतद्वृत्तिः - "सभावओ त्ति स्वभावतः पुद्गलानां मूर्तत्ववत् । परिणामओ त्ति परिणामेनाऽभूतस्य भवनेन पुरुषस्य तारुण्यवत् ।" इति । एतेन स्वभावः जीवसहचारिअ(र्य)विष्वग्भावसम्बन्धेन सर्वदाऽनुत्थानरूपः, परिणामस्तु परमाणुसंयोग-जन्योत्थानरूपः ।

**पन्नवणायां** ५ (१३) पदे परिणामो ह्यर्थान्तरगमनम्[१] । तच्च संयोगविशेषः संयोगजन्योपाधिः । यथा नीरोपरि बुद्बुदः नीरपरिणामः कथं शुद्धपरिणामः(?) स शुद्धस्वभाव इति स तु कथनमात्रं यथा जीवस्य भव्यत्वं[२] स्वभावतः, न परिणामत इत्यलं प्रसङ्गेन । [सिद्धं] सिद्धानां स्वतो नोत्पादव्यय [इति]।

ततो जातं जीवकर्मणोरनादिसंयोगजन्यपरिणामोपाधित्वम् । यदुक्तं **ठाणांगवृत्तौ** - 'एगबंधे'त्ति बन्धनं बन्धः सकषायत्वाद्, द्रव्यतो बन्धो निगडादिः, भावतः कर्मणा ।'

---

१. प्रापणम् । २. भव्यत्वं सिद्धिगमनकारणं, न त्वन्यत् किञ्चित् । तत्र सत्यपि भव्यत्वे सिद्धिगमनकारणे कियता कालेन निर्लेप ? इति भगवतीवृत्तौ शते १२ उ० २ । अत्र युक्तिर्भव्याभावोऽभव्यः स्वभावनिषेधः । [स्पष्टत्वार्थं जिज्ञासुभिर्वृत्तिरेव द्रष्टव्या ।]

ननु बन्धो जीवकर्मणोः संयोगा(गोऽ)भिप्रेतः । स खल्वादिमानादिरहितो वा स्यादिति कल्पनाद्वयम् । तत्र यद्यादिमानिति पक्षस्तदा किं पूर्वमात्मा पश्चात् कर्म १ अथ पूर्वं कर्म पश्चादात्मा २ उत युगपत् कर्मात्मानौ संप्रसूयेता ३ मिति त्रयो विकल्पाः । तत्र न तावत् पूर्वमात्मसम्भूतिः सम्भाव्यते निर्हेतुकत्वात्, खरविषाणवत् । अकारणप्रसूतस्य वाऽकारणत एवोपरमः स्यात् । अथाऽनादिरेवाऽऽत्मा तथाऽप्यकारणत्वान्नाऽस्य कर्मणा योग उपपद्यते नभोवत् । अथाऽकारणेऽपि कर्मणा योगः स्यात् तर्हि स मुक्तस्याऽपि स्यादिति । अथाऽसावात्मा नित्यमुक्त एव तर्हि किं मोक्षजिज्ञासया, बन्धाभावे च मुक्तव्यपदेशाभाव एवाऽऽकाशवदिति ।

नाऽपि कर्मणः प्राक् प्रसूतिरिति द्वितीयो विकल्पः संगच्छते, कर्तुरभावात् । न चाऽक्रियमाणस्य कर्मव्यपदेशोऽभिमतः । अकारणप्रसूतेश्चाऽकारणत एवोपरमः स्यादिति ।

युगपदुत्पत्तिलक्षणः तृतीयः पक्षोऽपि न क्षमः, अकारणत्वादेव । न च युगपदुत्पत्तौ सत्या'मयं कर्ता, कर्मेद'मिति व्यपदेशो युक्तः, सव्येतरगोविषाणवत् ।

अथाऽऽदिरहितो जीवकर्मयोग इति पक्षः । ततश्चाऽनादित्वादेव नाऽऽत्मकर्मवियोगः स्यात् ।

यच्चाऽऽदिरहितजीवकर्मयोगेऽभिधीयमानेऽनादित्वान्नाऽऽत्मकर्मवियोग इति, तदयुक्तमनादित्वेऽपि संयोगस्य विप्रयोगोपलब्धेः ।

जह कांचणोवलसंजोगोऽणादिसंतइगया(ओ) वि ।
वोच्छिज्जइ सोवायं तह जोगो जीवकम्माणं ॥

तथाऽनादेः सन्तान[स्य] विनाशो दृष्टः, जीवा(बीजा)ङ्कुरसन्तानवत् ।

अन्नयरमणिव्वत्तिय कज्झ बीयंकुराण जं विहियं ।
तच्छ(त्थ)हओ(?) संतानो(णो) कुक्कुडिअंडाइयाणं च(व) ॥

अनादिबन्धसद्भावेऽपि मोक्षो भवतीति ११ पत्रे **स्थानाङ्गवृत्तौ** ॥

**केचिद्** वदन्ति - जीवस्य द्वौ स्वभावौ शुद्धाशुद्धरूपौ । शुद्धेन मोक्षः, अशुद्धेन संसारः इत्यपि न, तयोरन्योन्यं विरोधात्, शीतातपयोरिव, जीवे न

घट(टे?)ते । यथा चेतनाचेतनस्वभावौ स्वरूपत एकस्थानेऽघटमानवत् । संसारस्य नरनारकादिपर्यायः स्वभावः, जीवस्य च शुद्धचैतन्यस्वभावः, तयोरेकत्राऽवस्थानं दुर्घटम् ।

यथा शुद्धहेम्नः द्वित्र्याद्यशुद्धभागजोटकयुक्ते हीनहीनतरादिमूल्यं सम्भवति । यथा [यथा] शुद्धं तथा तथा मूल्यमधिकादि स्यात् । सीसकसंशोधितस्याऽशुद्धभागपृथग्भावेन शुद्धस्वभावं सत् शुद्धमेव हेम भवति । तथा जीवोऽप्यशुद्धसंयोगजन्योपाधिपरिणामपरिणतोऽप्यशुद्धनिश्चयेन नरनारकादिपर्यायपरिणतोऽशुद्ध एव । यदा तु ज्ञानक्रियासीसकप्रायसंशोधितो जीवोऽनादिसंयोगदूरीकरणे मूलस्वभाव एव । यथा द्वयोरङ्गुल्योः संयोगे नष्टेऽङ्गुली तिष्ठतीति(त इति) ।

**दशवैकालिकश्रीहारिभद्रीवृत्तौ** २२(६२) पत्रे - परिणामप्रपञ्चः(?) नित्यानित्यैकान्तपक्षव्यवच्छेदेनाऽऽत्मानं परिणामिनमभिधित्सुराह -

एवं सतो जीवस्स वि, दव्वादी संकमं पडुच्चा ओ ।
परिणामो साहिज्जति पच्चक्खेणं परोक्खे वि ॥

पूर्वार्धं पूर्ववत् । पश्चार्द्धभावना पुनरियम् - न ह्येकान्तदृष्टाऽपि द्रव्यादिसङ्क्रान्तिर्देवदत्तस्य युज्यते इत्यतस्तद्भावान्यथानुपपत्त्यैव परिणामसिद्धिः । उक्तं च -

"नाऽर्थान्तरगमो यस्मात् सर्वथैव नचाऽऽगमः ।
परिणामः प्रमासिद्ध ई(इ)ष्टश्च खलु पण्डितैः ॥

"घटमौलिसुवर्णार्थी नाशोत्पादस्थितिष्वयम् ।
शोकप्रमोदमाध्यस्थ्यं जनो याति सहेतुकम् ॥

"पयोव्रतो न दध्यत्ति न पयोऽत्ति दधिव्रतः ।
अगोरसव्रतो नोभे तस्माद् वस्तु त्रयात्मकम् ॥"

नित्य आत्माऽनादिपरिणामभावादिति स्वभावतोऽनाज्झ(द्य)मूर्तपरिणामित्वात् ई(इ)ति गाथार्थः ।

"एस णं भंते! जीवे तीतमणंतं सासयं [समयं दुक्खी समयं अदुक्खी] समयं दुक्खी वा अदुक्खी वा पुव्विं च णं करणेणं अणेगभावं अणेगभूतं परिणामं परिणमति । अह से वेदणिज्जे(ण्णे) निज्जिणे भवति । तओ पच्छा

एगभावे एगभूते सिया ? हंता गो० ! एस णं जीवे जाव एगभूए सिया, एवं पडुप्पन्नं सासयं समयं, एवं अणागयमणंतं सासयं समयं ॥'' - भग० श० १४ उ० ४ ।

वृत्तौ जीवस्वरूपं निरूपयन्नाह - ''एस णं भंते! जीवे त्ति। एष प्रत्यक्षो जीवोऽतीतेऽनन्ते शाश्वते समये समयमेकं दुःखी दुःखहेतुयोगात् समयं चाऽदुःखी सुखी(ख)हेतुयोगाद् बभूव, समयमेव [च] दुःखी वाऽदुःखी वा, वा-शब्दयोः समुच्चयार्थत्वाद् दुःखी च सुखी च तद्धेतुयोगात् । न पुनरेकदा सुख-दुःखवेदनमस्त्येकोपयोगत्वाज्जीवस्येति । एवंरूपश्च सन्नसौ स्वहेतुतः किमनेकभावं परिणामं परिणमति पुनश्चैकभावपरिणामः स्यात् ? इति पृच्छन्नाह - पुव्विं च णं करणेणं इत्यादि । पूर्वं च एकभावपरिणामात् प्रागेव करणेन कालः(ल)स्वभावादितिका(दिका)रणसंच(व)लितस(त)या शुभाशुभकर्मबन्धहेतु-भूतया क्रिययाऽनेको भावः पर्यायो दुःखितत्वादि(खित्वादि)रूपो यस्मिन् स तथा । तमनेकभावं परिणाममिति योगः । अणेगभूयं ति अनेकभावत्वादेवाऽनेकरूपं परिणामं- स्वभावं परिणमइ त्ति अतीतकालविषयत्वादस्य परिणतवान्- प्राप्तवानी(नि)ति ।

''अह से त्ति । अथ त[द्] दुःखितत्वाज्ञ(द्य)नेकभावहेतुभूतं वेयणिज्ज त्ति वेदनीयं कर्म उपलक्षणत्वाच्चाऽस्य ज्ञानावरणीयादि वा(च) निर्जीर्णं- क्षीणं भवति । ततः पश्चात् एगभावे त्ति एको भावः सांसारिकसुखविपर्ययात् स्वाभाविकसुखरूपो यस्याऽसावेकभावोऽत एव एकभूत- एकत्वं प्राप्तः सिय त्ति बभूव कर्मकृतधर्मान्तरविरहादी(दि)ति प्रश्नः । इहोत्तरमेतदेव । एवं प्रत्युत्पन्नानागतसूत्रेऽपी (त्रे अपी)ति ।''

**पन्नवणायां** विशेषपदे ५मे पर्यायाधिकारः - ''जीवपज्जवा य अजीव-पज्जवा य । जीवपज्जवा णं भंते! किं संखेज्जा असंखेज्जा अणंता ? गो०! नो संखेज्जा नो असंखेज्जा अणंता । से केणट्ठेणं भंते । अणंता ? गो०! असंखिज्जा णेरइया असुरा नागा पुढविआउतेउवाउकाईया अणंता वणस्सईकाइया असंखा बितिचउरिंदिया मणुस्सा वंतरा जोइसिआ वेमाणिआ अणंता सिद्धा स(से) तेणट्ठेणं गो०! अणंता पज्जवा [सूत्र १०३] ॥''

वृत्तिः - ''तत्र पर्याया गुणा विशेषा धर्मा इत्यनर्थान्तरम् । औदयि-

कादयश्च जीवाश्रयास्ततो जीवपर्याया एव गम्यते(न्ते) । औदयिको भावः पुद्गलवृत्तिरपि । सम्बन्धपरिमाण(णा)वगमाय पृच्छति - 'जीवपज्जवा णं भंते! किं संखेज्जा ?' इत्यादि । वनस्पतिसिद्धवर्जा नैरयिकादयोऽसङ्ख्येयाः, मनुष्येत्व(ष्व)सङ्ख्येयत्वं संमूर्च्छिमापेक्षया, वनस्पतयः सिद्धाश्चाऽनन्तास्ततः पर्यायिणामनन्तत्वात् पर्याया अनन्ताः ।''

''नेरईं(इ)याणं भंते! केवइ(इ)या पज्जवा ? गो०! अणंता । से केणट्ठेणं भंते!, गो०! नेरइयाए नेरईं(इ)यस्स दव्वट्ठयाए तुल्ले पएसट्ठयाए तुल्ले उग्गाहणट्ठयाए सिय हीणे सिय तुल्ले सिय अब्भहिए ठिइए सिय हीणे सिय तुल्ले सियमब्भहीण(अब्भहिए) [सूत्र १०४] ।

एतद्वृत्तिः - ''केनाऽभिप्रायेण भगवतैवं निर्वचनमवाचि - नैरयिका(को) नैरयिकस्य द्रव्यार्थतया तुल्य इति ? उच्यते - एकमपि द्रव्यमनन्तपर्याय-मेतन्न्यायप्रदर्शनार्थम् । नारकजीवद्रव्यमेकसङ्ख्याकं नैरयिकस्य द्रव्यार्थतया तुल्यः । पएसट्ठिए त्ति नारकजीवद्रव्यं लोकाकाशप्रदेशप्रमाणप्रदेशमिति नारको नारकस्य तुल्यप्रदेश एवाऽर्थः । द्विविधं द्रव्यं - प्रदेशवदप्रदेशवच्च । तत्र परमाणुरप्रदेशः, द्विप्रदेशादिकं प्रदेशवत् । एतद्द्वयं पुद्गलास्तिकाये एव । शेषाणि धर्मास्ति-कायादीनि द्रव्याणि नियमास्स(त्स)प्रदेशानि ।

'उग्गाहणयाए त्ति सिय हीणे' इत्यादि । नैरयिकोऽसङ्ख्यातप्रदेशो-ऽपरस्य नैरयिकस्य तुल्यप्रदेशस्य अवगाहनं- शरीरोच्छ्रयः स एवाऽर्थः । तथा सिय हीणे त्ति स्याच्छब्दः प्रशंसाऽस्तित्वविवादविचारणाऽनेकान्तसंशयप्रश्नादि-ष्वर्थेषु । अत्राऽनेकान्तज्झोति(द्योत)कस्य ग्रहणम् । स्याद्धीनोऽनेकान्तेन हीन इत्यर्थः । स्यात्तुल्योऽनेकान्तेन तुल्यः । स्यादभ्यधिकोऽनेकान्तेनाऽभ्यधिकः । कथमिति चेदुच्यते - यस्माद् वक्ष्यति - रत्नप्रभायां नैरयिकाणां भवधारणीय-शरीरस्य जघन्येनाऽवगाहनाया अङ्गुलस्याऽसङ्ख्येयो भाग उत्कृष्टतः ७ धनूंषि ३ हस्ता ६ अङ्गुलानि । उत्तरोत्तरासु पृथ्वीषु द्विगुणद्विगुणं यावत् सप्तमपृथ्वी-नैरयिकाणां जघन्यतोऽवगाहनाऽङ्गुलस्याऽसङ्ख्य(ख्येयो) भागः, उत्कृष्टतः ५०० धनुःशतानि । तत्र जइ हीणेति चतुःस्थानपतितं ज्ञेयम् । ठिइ(ई)ए सिय हीणे सिय तुल्ले सियमब्भहिए त्ति । एवमेकनारकस्याऽपरनारको(का)पेक्षया द्रव्यतो द्रव्यार्थतया प्रदेशार्थतया च तुल्यत्वमुक्तम् । क्षेत्रतोऽवगाहनं प्रति हीनाधिकत्वेन

चतुःस्थानपतितत्वम् । कालतोऽपि स्थितितो हीनाधिकत्वेन चतुःस्थानपतितत्वम् ।''

''केवलनाणी मणूसे केवलनाणिस्स मणूसस्स दव्वट्ठयाए तुल्ले पदेसट्ठयाए तुल्ले उग्गाहणट्ठाए चउठाणवडिए ठिईए तिठा(ट्ठा)णवडिए वण(न्न)रसगंधफास-पज्जवेहिं छठा(ट्ठा)णवडिए केवलनाणपज्जवेहिं केवलदंसणपज्जवेहि य तुल्ले ॥'' [सूत्र - ११६]

वृत्तिः - ''केवलज्ञानसूत्रे तु ओगाहणट्ठाए त्ति केवली(लि)समुद्घातं प्रतीत्य । केवलिसमुद्घातगतः केवली शेषकेवली(लि)भ्योऽसङ्ख्येयगुणा-[धिका]वगाहनः, तदपेक्षया शेषाः केवली(लि)नोऽसङ्ख्येयगुणहीनावगाहनाः, स्वस्थाने तु शेषाः केवलिनस्त्रिस्थानपतिता इति । स्थित्या त्रिस्थानपतितत्वं सङ्ख्येयवर्षायुष्कत्वात् ।

[इतः परं पन्नवणा - ५पदगत मतिज्ञानादेः परमाणुपुद्गलस्य च पर्यायपरिमाणसम्बन्धिसूत्राणि सवृत्तिकानि यथावदुद्धृतानि सन्ति । तान्यत्र न मुद्रितानि - सं०]

तथा मतिज्ञानमभव्यानां नाऽस्ति ।

गइ १ इंदिय २ काए ३ जोए ४ वेए ५ कसाय ६ लेसासु ७ ।
सम्मत्त ८ नाण ९ दंसण १० संजय ११ उवओग १२ आहारे १३ ॥
भासग १४ परित्त १५ पज्जत्त १६
सुहुम १७ सन्नी १८ अ होइ भव १९ चरिमे २० ।
आभिणिबोहियनाणं मग्गिज्जई एसु ठाणेसु ॥

मतिज्ञानं चतुर्गतौ प्राप्यते १ । पञ्चिन्द्रियेष्वेव प्राप्यते । द्वीन्द्रियादयोऽसम्यक्त्वा, मत्यज्ञानमेव लभ्यते २ । त्रसकायेष्वेव मतिज्ञानम्, एकेन्द्रियत्वेन मिथ्यात्विन उत्पद्यन्ते ३ । मनोवचनकायत्रिकयोगेष्वेव मतिज्ञानं प्राप्यते, एक-द्विकयोगयोगे तु मत्यज्ञानमेव ४ । वेदत्रयेऽपि मतिज्ञानम् ५ । द्वादशकषायेऽनन्तानु-बन्धि ४ वर्जिते मतिज्ञानं प्राप्यते ६ । पद्मतेजःशुक्ललेश्यासु मतिज्ञानं प्राप्यते ७ । सम्यक्त्ववतो मतिज्ञानम् ८ । मतिश्रुतावधिमनःपर्यवेषु मतिज्ञानं, नतु केवलज्ञाने व्युच्छिन्नं मतिज्ञानम् ९ । चक्षुर्दर्शनादि ४ विषये(?) मतिज्ञानम् १० । चारित्रिणो निश्चयेन मतिज्ञानम् ११ । साकारेऽनाकारे मतिज्ञानम् १२ । यस्मिन्

समये आहारं करोति तत्राऽऽहारकः, भवान्तरे वक्रगत्यादौ अनाहारकः, तत्राऽऽहारकिनो मतिज्ञानं प्राप्यते, अनाहारकिनो मतिज्ञानं न लभ्यते १३ । भाषकस्य मतिज्ञानं लभ्यते १४ । प्रत्येकशरीरिणो मतिज्ञानं प्राप्यते, सूक्ष्माणां तु न १५ । पर्याप्तानां मतिज्ञानं, न त्वपर्याप्तानाम् १६ । [बादराणां मतिज्ञानं, न तु सूक्ष्माणाम् १७ ।] संज्ञिनां मतिज्ञानं, न त्वसंज्ञिनाम् १८ । भव्यानामेव मतिज्ञानं प्राप्यते, न त्वभव्यानाम् १९ । अनन्तेऽपि काले यो मोक्षं यास्यति स चरमशरीरी, तस्य मतिज्ञानम्, अन्ये भव्यत्वेऽपि सामग्य्रप्रापणदोषेण मोक्षं न यास्यन्ति तेऽचरमास्तेषां मतिज्ञानं न प्राप्यते । उक्तम् -

"सामग्गीअभावाओ ववहाररासीअप्पे(प्प)वेसाओ ।
भव्वा वि ते अणंता जे सिद्धिसुहं न पावेंति ॥"

२० द्वारैर्मतिज्ञानस्य सत्पदप्ररूपणा कृता **आवश्यकपीठिकायाम्** ।

"मइणाणपज्जवा सुअनाणपज्जवा ओहिणाणपज्जवा मणपज्जयणाण-पज्जवा केवलनाणपज्जवा ।" [भग० श० ८ उ० २]

तद्वृत्तिः - "पर्यायद्वारे केवइया [इत्यादि] । मतिज्ञानस्य पर्या(र्य)वा-विशेषा(ष)धर्मा-अभिनिबोधिकज्ञानपर्यवः(वाः) । ते च द्विविधा(ः) स्वपरपर्याय-भेदात् । तत्र येऽवग्रहादयो मतिविशेषाः क्षयोपशमै(म)वैचित्र्यात् ते स्वपरपर्यायाः (स्वपर्यायाः), ते चाऽनन्ताः । कथम् ? एकस्मादवग्रहादेरन्योऽवग्रहादिरनन्त-भागवृद्ध्या विशुद्धोऽन्यस्त्वसङ्ख्येयभागवृद्ध्याऽपरः *सङ्ख्येयगुणवृद्ध्या । सङ्ख्यातस्य सङ्ख्यातभेदत्वादनन्ता विशेषाः तज्ज्ञेयस्याऽनन्तत्वात् प्रतिज्ञेयमथवा मतिज्ञानमविभागपलिच्छेदैर्बुद्ध्या छिद्यमानमनन्तं खण्डं भवतीत्येवमनन्तास्त-त्पर्यायाः । ये पदार्थान्तरपर्यायास्ते तस्य परपर्यायाः, ते च स्वपर्यायेभ्योऽन-न्तगुणाः, परेषामनन्तगुणत्वात् ।

ननु यदि ते परपर्यायास्तदा तस्येति व्यपदेष्टुं न युक्तं, परसम्बन्धित्वात् । अथ ते तस्य, तदा न [पर]पर्यायास्ते व्यपदेष्टव्याः, स्वसम्बन्धित्वात् । अत्रोच्यते - यस्मात् तत्राऽसम्बद्धास्ते तस्मात् तेषां परपर्यायव्यपदेशः, यस्माच्च ते परित्यज्य-मानत्वेन तथा स्वपर्यायाणां 'स्वपर्याया एते' इत्येवं विशेषणहेतुत्वेन

---

* इत आरभ्याऽस्मिन्नुद्धरणे बह्वी पाठच्युतिः । अभ्यासार्थिना वृत्तिर्द्रष्टव्या - सं. ।

च तस्मि-न्नुपयुज्यन्ते तस्मात् तस्य पर्यवा इति व्यपदिश्यन्ते । यथाऽसम्बद्धमपि धनं स्वधनमुपयुज्यमानत्वादिति ।

अनन्ताः श्रुतज्ञानपर्यायाः स्वपरभेदाद् द्वेधा । तत्र स्वपर्या[या] ये श्रुतज्ञानस्य स्वगता अक्षरश्रुतादयो भेदास्ते चाऽनन्ताः, क्षयोपशमवैचित्र्यविषयानन्ता (न्त्या)भ्यां श्रुतानुसारिणां बोद्धा(धा)नामनन्तत्वात् । [पर]पर्यायास्त्वनन्ताः सर्वभावानां प्रति[ती]ताः ।

ये मनःपर्ययज्ञानस्य केवलज्ञानस्य [च] स्वपर्याया ये स्वाम्यादिभेदेन स्वगता विशेषास्ते चाऽनन्ता अनन्तद्रव्यपर्यायपरिच्छेदापेक्षयाऽविभाग-पलिच्छेदापेक्षया चेति ।

अल्पबहुत्वे मतिश्रुतावधिमनःकेवलानां केवलज्ञानपर्याया अनन्तगुणाः, सर्वद्रव्यपर्यायविषयत्वात् तस्येति भगवतीशतके ८ उद्देशः ३(२) आत्मा ८ अधिकारः (?) । भगवतीशतके १२ उद्देश १० ॥

इति श्रीस्याद्वादचर्चाप्रमाणं समाप्तम् । ग्रन्थाग्रं ३६० ॥

★

## टिप्पणात्मकान्युद्धरणानि

पत्र-१

* प्रवचनोड्डाहरक्षणार्थं गुरुलाघवपर्यालोचनेन मृषा भाषमाणः साधुराराधक एव । "सच्चमेयं भासजायं बीयं मोसं तईयं सच्चामोसं चउत्थं असच्चामोसं । इच्चाइ चत्तारि भासज्जायाइं आउत्तं भासमाणे आराहए णो विराहए ।" (प्रज्ञा० भाषा पद ११)
* पर्याया गुणा धर्मा विशेषा इत्यनर्थान्तरम् । औदयिकक्षायोपशमिक-क्षायिकौपशमिका जीवपर्यायाः । औदयिकभावः पुद्गलवृत्तिः । पन्नवणा ५ पदे ।

पत्र-४

* "जीवे णं भंते! इंदिआइं पडुच्च [किं पोग्गली] पोग्गले ? गो०! जीवे

पोग्गली वि पोग्गले वि । नेरइए पोग्गली वि पोग्गले वि । सिद्धे णो पोग्गली त्ति ।" (भग० श० ८ उ० १०) वृत्तिः – "पुद्गलाः श्रोत्रादिरूपा विद्यन्ते यस्याऽसौ पुद्गली । पुग्गल त्ति पुद्गल इति संज्ञा जीवस्य ततस्तद्योगात् पुद्गल इति ॥"

* चरमाः चरमभववन्तो भव्यविशेषा ये सेत्स्यन्ति ते चरमा तद्विपरीता अचरमा अभव्याः सिद्धाश्च । कायस्थितिसूत्रे चरमोऽनादिसपर्यवसितः । अचरमो द्विधा - अना०....

—x—

# श्रीपार्श्वनाथसमसंस्कृतस्तवः

**– सं. मुनि धर्मकीर्तिविजय गणि**

आ पदना रचयिता खरतरगच्छपति **श्रीजिनचन्द्रसूरि**जीना शिष्य **श्रीसमयराजमुनि** छे. आ स्तवननी प्रत सं. १६३५मां लखायेली होवाने लीधे तेनी रचना सं. १६३५नी सालमां अथवा ते पूर्वे थई हशे.

झुलणा छन्दमां के प्रभातियाना ढाळमां रचायेली आ गेय कृतिमां जुदां जुदां विशेषणो द्वारा पार्श्वनाथप्रभुना गुणोनुं वर्णन करवामां आवेल छे. छेल्ली गाथा 'हरिगीत'मां छे. सत्तरमा शतकमां ज लखायेली ४ पानानी प्रतमां चोथा पत्रमां आ रचना लखायेली छे. आ प्रतनी जेरोक्स नकल पू. मुनि श्रीधुरन्धरविजयजी म. तरफथी प्राप्त थई छे.

*

विमलकुलकमलरविकिरणनरपुंगवं
देवदेवं सुसेवामि वामाभवं ।
नीरकणहीरहरहारमहिमारवं
मलयमंदरमहासारधीरं नवं ॥१॥

भिन्नसंसारसंसरणबहुकारणं
छिन्नछलबंधभवभोगजलतारणं ।
भीमभयभूमिरुहमत्तवरवारणं
कलहकलिकालभावारिगणवारणं ॥२॥

कमलकोमलमहाकायगुणपरिमलं
मोहहरमिंदुदलभालनिस्समबलं ।
मंगमंगलमहावल्लिसुंदरजलं
मूलमायारसादारदारुणहलं ॥३॥

सिद्धिरमणीवरं सिद्धनरकुंजरं
नीरमणरोगसंभोगगुणसुंदरं ।
जीवसंदेहसंदोहदवसंवरं
नंदिकरनीलमणितालदलसंचरं ॥४॥

चारुवंदारुवासवसुरासुरनरं
गरिमगंभीरसागरनिरामयगरं ।
मारिघोरारिचोरावलीभयहरं
नीरमणिरंगबहुभंगमायावरं ॥५॥
भंदवरवारिरुहखरकिरणबंधुरं
रागहिंसामहातरुतरुणसिंधुरं ।
कुनयकरिकेसरिणमिंदिरामंदिरं
बुद्धिसुसमिद्धमंचामि दमिचंदिरं ॥६॥
इति भावसुंदर नतपुरंदर! पार्श्वजिन! तव वर्णना
समसंस्कृताचलवचनरचनैर्व्यरचि रुचिराकर्णना ।
गणधारिश्री**जिनचंद्र**सूरीश्वरपदाम्बुजसेविना
**मुनिसमयराज**विनेयकेनाऽऽनन्ददा बहुभाविना ॥९॥

इति श्रीपार्श्वनाथसमसंस्कृतस्तवः समाप्तः ॥

संवत् १६३५ वर्षे अश्वयुग्मासे विजयदशम्यामलेखि पं० नयकमलगणि-वाचनार्थम् ॥श्रीः॥

—x—

# शिवमण्डनगणिविरचितम्

# वागडपद्रपुरमण्डन-आदिनाथस्तवनम्

– सं. अमृत पटेल

[नोंध : श्रीसोमसुन्दरसूरिजीना प्रशिष्य रत्नशेखरसूरिना शिष्य शिवमण्डनगणि द्वारा आ २४ पद्यनुं वागडपद्रपुरमां बिराजमान श्रीआदिनाथ प्रभुनुं स्तवन रचायुं छे. कर्ताअे अन्ते करेला उल्लेखना आधारे तेमने पोताना गुरुभगवन्त तथा लक्ष्मीसागरसूरि-सोमदेवसूरिजी पर ऊंडो आदरभाव हशे ते देखाई आवे छे. ते सिवाय कर्ता अंगे कोई विशेष हकीकत उपलब्ध थती नथी. 'वागडपद्रपुर' अे पाटण पासे आवेलुं 'वागडोद' होई शके ? त्यां गोपाल सङ्घपतिअे पोताना छ भाईओ साथे आदीश्वरनी प्रतिमा पधरावी हती तेवी श्लोक १३मां नोंध छे.

कृतिनां प्रथम २३ पद्यो भुजङ्गप्रयातवृत्तमां अने अन्तिम श्लोक शार्दूलविक्रीडित छन्दमां छे. कृतिना प्रत्येक पद्यमां कर्तानी विद्वत्ता, कवित्वशक्ति अने भगवद्भक्ति झळके छे. प्रासानुप्रासने लीधे काव्य रमणीय बन्युं छे.

लालभाई दलपतभाई ज्ञानमन्दिरना हस्तप्रतसङ्ग्रहगत ला.द.भे.सू. ३२८४ क्रमाङ्कनी सं. १५२०मां प्रायः कर्ताना शिष्यना हाथे लखायेली २ पानानी प्रतना आधारे कृतिनुं सम्पादन थयुं छे.

प्रस्तुत कृतिनी पं. श्रीअमृत पटेले स्वहस्ते लखेली प्रतिलिपिना आधारे यथामति संशोधनपूर्वक अत्रे आ कृति प्रकाशित थई छे. मूळ प्रत मळे तो हजु वधारे शुद्धीकरणने अवकाश छे. –त्रै.]

*

जयश्रीनिवासैकगेहं स्तुवेऽहं,
जगत्पूरितेहं सुवर्णाभदेहम् ।
युगादीशदेवं श्रियां वासुदेवं
सुपर्वात्तसेवं स्मरे वामदेवम् ॥१॥
गुणाम्भोनिधे! वक्तुमीशो गुणानां,
सुधीः कः कलौ सम्भवेत् तावकानाम् ।

तथाऽप्यद्भुतस्वीयभक्तिप्रयुक्तः,
स्तुवे त्वां विभो! मुग्धभावाभियुक्तः ॥२॥
भवाब्धि तरीतुं तरीशल्प(?)कल्पां,
तवाऽऽज्ञां बरीभर्त्ति यो निर्विकल्पाम् ।
वरीवर्त्ति तं स्वीकृतेवाऽत्र लक्ष्मीः,
सरीसर्त्ति तस्य स्फुटं कीर्त्तिलक्ष्मीः ॥३॥
महामोहयोगेन पूर्वं गरिष्ठं,
न लब्धं क्रमाब्जं विभो! ते वरिष्ठम् ।
अतः क्रोध-कन्दर्प-लोभादियोधाः,
प्रभो! ही निमज्जन्ति मां ध्वस्तरोधाः ॥४॥
स्फुरद्भक्तिरागेन यस्तोष्टुवीति,
तथा कोऽपि कोपात् पराबोभवीति ।
इयं ते नुतिस्तत्र चेतःप्रवृत्तिः,
समाशोभते पापपङ्क्तेर्निवृत्तिः ॥५॥
भृशं सेविता मुक्तये जीवलोके,
हराद्याः समर्था मया नाऽवलोके(?) ।
अलं याचिता देवरत्नस्य बुद्ध्या,
सुखं दातुमेते स्तवः किं त्रिशुद्ध्या(?) ॥६॥
स्मृतिर्यस्य जन्मौघकोट्यर्जितानि,
छिनत्ति क्षणादप्यहोऽघानि तानि ।
विभो नाऽर्चि नाऽनावि नाऽध्यायि स त्वं,
मुधा हारितं तेन ही मानुषत्वम् ॥७॥
युगादौ युगादीश! सन्मार्गरीति-
स्त्वया स्थापिता लुम्पिता कर्मभीतिः ।
अतस्त्वां प्रभुं देवदेवेशभावं,
प्रपन्नोऽस्म्हं त्यक्तरागादिभावम् ॥८॥
प्रगे यश्चरीकर्त्ति तेऽर्चां विशुद्धां,
जरीहर्त्यसौ कश्मलालीमशुद्धाम् ।

त्वदग्रे नरीनर्त्ति देव! स्वभक्त्या,
वरीवर्त्ति सौख्येन्दिरा तं स्वशक्त्या ॥९॥
न याचे विना त्वां स्फुरद्देवतर्द्धिं,
तथा स्वर्णरूप्यादिनिश्शेषसिद्धिम् ।
परं प्रार्थयेऽहं प्रभो! बोधिलाभं,
शिवश्रीपरीरम्भसँल्लग्नकामम् ॥१०॥
विभो! दुःख-दौर्गत्य-दौर्भाग्यहर्त्ता,
ध्रुवं जीवलोके मनोऽभीष्टकर्ता ।
तथा स्पष्टदुष्टाष्टकर्मौघभेत्ता,
जय त्वं युगादिवि(प्र)भो! विश्ववेत्ता ॥११॥
मया त्वत् परः प्रापि नो कः कृपालुः,
प्रभो! त्वं नुतो नाऽस्म्यतः संशयालुः ।
अशंसीतिभावे भवेत् स्वामिभक्ति-
स्ततो मुक्तिसार्द्धं न मे का विभक्तिः? ॥१२॥
कथा श्रीमतां स्वप्रशंसानिवासः,
स **गोपालसङ्घाधिपः** श्रीविलासः ।
**सषट्बन्धुना**ऽस्थापि येनाऽ**ऽदिमूर्त्ति**-
र्न किन्तु स्फुरन्मूर्त्तिमत्सौवकीर्त्तिः ॥१३॥
सुधानिर्मितेवाऽस्ति मूर्त्तिस्त्वदीया,
प्रभो! मन्यते शुद्धबुद्धिर्मदीया ।
न चेज्जन्मकोट्यर्जितः पापतापः,
कथं क्षीयते दर्शनात् सप्रतापः ॥१४॥
निवासं हृदि त्वं यदा मे विधास्ये (विधत्से?),
तदाऽहं प्रभो! निर्मलत्वं प्रयास्ये ।
कथं जीवलोके स्थिरं स्थातुमीष्टे,
तमश्चक्रवालं सहस्रांशुदृष्टे ॥१५॥
सदा धीवरैः सेवितत्वात् समुद्र-
स्त्वमेवाऽस्यहो मौक्तिकश्रीद्धभद्रः ।

अपापः* परं वर्त्तसे कौतुकं तत्,
ततोऽप्याश्रितस्तार्यते चित्रमेतत् ॥१६॥
मदक्रोधकन्दर्परोगाद्यनर्था-
स्त्रिलोकीतले वैरिणो ये समर्थाः ।
तव ध्यानमात्रेण ते यान्ति नाशं,
मृगाः सिंहनादाद् यथा निःप्रकाशम् ॥१७॥
मयाऽद्य प्रभो! चिन्तितार्थप्रदायी,
समासादि चिन्तामणिः सातिशायी ।
अतः संश्रयन्ते विभो! मे समग्राः,
पराः सम्पदः सर्वभावादुदग्राः ॥१८॥
पदाम्भोरुहे संश्रिते संसृतौ ते,
निमज्जन्ति किं भव्यमर्त्त्याः समे ते ।
महासागरे यानपात्रोपयुक्ताः,
कथं पोतवाहाः पतन्त्यर्थयुक्ताः ॥१९॥
स्वभक्त्या प्रभुं त्वां बुधा ये स्तुवन्ते,
दुरापं शिवश्रीसुखं ते लभन्ते ।
न किं प्रार्थितः पारिजातोऽर्थिजातं,
कृतार्थं विधत्ते कदा निःस्वतार्त्तम् ॥२०॥
जगत्यां जगत्सृष्टितो विश्वकर्त्ता,
तथाऽजत्त्व(जोऽस्य)तस्त्वं प्रभो लक्ष्मिभर्त्ता ।
विभो! शङ्करः संस्कृतेर्विद्यसे त्वं,
समग्रार्थसार्थोक्तितः सर्ववित् त्वम् ॥२१॥
मम त्वं गुरुस्त्वं सुहृत् त्वं च माता,
मतिस्त्वं गतिस्त्वं धृतिस्त्वं च नेता ।
यशस्त्वं रतिस्त्वं धनं त्वं जनेता,
प्रपन्नोऽस्म्यहं त्वामतो मुग्धचेताः ॥२२॥

---

* अपगता आपो यस्मात् स अपापः, समुद्रोऽप्यपाप इति विरोधः, अ-पाप इति तत्समाधानम् । - सं०

सृतं मे धनैर्भूरिभिः कीर्त्तिवृद्ध्या,

सुतस्त्र्यादिभावैस्तथा राज्यऋध्या ।

परं तिष्ठतु स्वामिभावेन मे त्वं,

हृदि प्रार्थये त्वामिदं नाथ! तत्त्वम् ॥२३॥

स्तुत्वैवं गुरु**रत्नशेखर**विभाविद्योतिताङ्घ्रद्युते!,

**लक्ष्मीसागर-सोमदेव**जगतीसम्बोधक्षित्युद्युते! ।

श्रीमद्**वागडपद्र**भूमिरमणीभालस्थलीभूषण!,

त्वां याचे **शिवमण्डना**ऽख्यपदवीं श्रीआदिनाथप्रभो! ॥२४॥

—x—

# मानाङ्कनृपतिविरचितं पूर्णतल्लगच्छीय-श्रीशान्तिसूरिकृतटीकोपेतं वृन्दावनकाव्यम्

– सं. मुनि त्रैलोक्यमण्डनविजय

संस्कृत काव्यसाहित्यनो अेक प्रकार 'खण्डकाव्य' छे. खण्डकाव्यमां महाकाव्यनी जेम व्यक्तिना समग्र जीवनकाळनुं के लांबा समय सुधी चालती घटनानुं वर्णन होतुं नथी. तेमां तो फक्त एकाद नानकडा प्रसङ्गनुं के वस्तुनुं बयान ज होय छे. तेथी ते काव्यनो एक टुकडो ज गणाय छे. खण्डकाव्यनुं लक्षण पण्डित विश्वनाथ आवुं जणावे छे : "खण्डकाव्यं भवेत् काव्यस्यैक-देशानुसारि यत्" (साहित्यदर्पण - ६.३०९) अर्थात् खण्डकाव्यमां महाकाव्यना एकदेश-एकाद घटना के वस्तुनुं ज विशेष वर्णन होय छे.

प्रस्तुत वृन्दावनकाव्य पण एक खण्डकाव्य ज गणाय छे. जैन संस्कृत साहित्यनो इतिहास - खण्ड २, प्रकरण ३५मां (ले. - हीरालाल र. कापडिया, प्र. - मुक्तिकमल जैन मोहनमाला, १९६८) जणाव्या मुजब जे ८ अजैन खण्डकाव्यो पर जैन मुनिओअे टीकाओ रची छे, तेमां आनो समावेश थाय छे.

कुल ५२ श्लोको धरावता आ काव्यनुं विषयवस्तु आ प्रमाणे छे : श्लोक १-३. विष्णुस्तुति ४-६. बलदेवस्तुति ७-११. कविना पिता उग्रसेन राजानुं गुणवर्णन १२. काव्यनो उपन्यास १३-१४. कृष्ण-बलदेवनुं वृन्दावनगमन १५-२८. वर्षावर्णन २९-३३ कृष्णशोभावर्णन ३४-३६. बलदेवशोभावर्णन ३७-५१. बलदेवे कृष्णने उद्देशीने करेलुं उद्बोधन ५२. उपसंहार.

आ समग्र काव्य यमकमय छे. श्लोक १-३१, ३४-३७, ४०-५२ मां प्रथम अने द्वितीय चरणना तेमज तृतीय अने चतुर्थ चरणना अन्तिम ४-५ वर्ण सरखा छे, ज्यारे श्लोक ३२-३३, ३८-३९ अन्य प्रकारनो यमक धरावे छे.

समग्र काव्य अवलोकतां कर्ताना वैदुष्य, शब्दशास्त्र पर प्रभुत्व, कल्पनाशक्ति व. प्रत्ये अहोभाव जन्मे तेम छे.

काव्यना कर्ता उग्रसेननृपतिना पुत्र छे. तेमनुं मूळ नाम तो अज्ञात छे, पण

साहित्यक्षेत्रे तेओ '**मानाङ्क**' नामथी ओळखाय छे. '**मेघाभ्युदय**' नामनुं यमकमय खण्डकाव्य पण तेमनी ज रचना गणाय छे. गीतगोविन्दकाव्य पर तेओअे टिप्पण पण लख्युं छे. (Jayadeva's Gitagovinda with king Mananka's commentary प्र. - ला.द. विद्यामन्दिर, १९६५). मालतीमाधव पर तेमणे टीका रची होवानुं पण मनाय छे. ई.स. नी १२मीथी १४मी सदी वच्चे तेमनो सत्ताकाळ गणाय छे. पण टीकाकार शान्तिसूरिनो सत्तासमय ई.स.नी ११मी सदी ध्यानमां लेतां मानाङ्कनो सत्तासमय ते पूर्वे होवो जोईअे.

वृन्दावनकाव्य पर अन्य टिप्पणो लखायां हशे अने प्रसिद्ध पण थयां हशे, ते विशे झाझो ख्याल नथी. पण जैनमुनिओअे रचेलां त्रण विवरणो विशे जै.सं.सा.इ.-प्रकरण ३५मां उल्लेख छे. १. पूर्णतल्लगच्छीय वर्धमानसूरिशिष्य शान्तिसूरि विरचित २. वृद्धगच्छना रत्नप्रभसूरिना शिष्य लक्ष्मीनिवासे वि.सं. १४९६मां रचेली मुग्धावबोध टीका ३. जिनरत्नकोश - विभाग १, पृ. ३६५मां उल्लिखित रामर्षिनी वृत्ति. आ त्रणे टीका अद्यावधि अप्रकाशित होवानुं जाणवामां छे. तेमांथी श्रीशान्तिसूरिविरचित टीका अत्रे प्रकाशित थई रही छे.

प्रखर नैयायिक, दार्शनिक अने न्यायावतारवार्तिकवृत्तिना कर्ता तेमज महाकवि धनपालनी तिलकमञ्जरी पर टिप्पण लखनारा शान्तिसूरि ज आ काव्य पर टीका रचनार शान्तिसूरि छे. तेमणे वृन्दावनकाव्यनी वृत्तिना प्रारम्भमां ज मन्दबुद्धि जीवोना बोध माटे वृन्दावन वगेरे पांच यमकमय दुर्गम काव्यो पर टीका रचवानी प्रतिज्ञा करी छे. आ पांच काव्योनां नाम त्यां जणावायां नथी. पं. लालचन्द्र भगवानदास गान्धीए 'जेसलमेरभाण्डागारीयग्रन्थानां सूची'मां आ काव्योनां नाम **वृन्दावन, घटखर्पर, मेघाभ्युदय, शिवभद्र** अने **चन्द्रदूत** जणाव्यां छे. ज्यारे प्रो.हीरालाल कापडियाअे जै.सं.सा.इ.मां चन्द्रदूतनी जग्याए **राक्षसकाव्य** गणाव्युं छे. वास्तवमां शान्तिसूरिजी महाराजने वृन्दावनादि ५मां 'चन्द्रदूत' अभिप्रेत हशे के 'राक्षस' ते आपणे नथी जाणता. पण तेमणे उपरोक्त छअे खण्डकाव्यो पर टीका रची छे ते हकीकत छे. जै.सं.सा.इ.मां जम्बूनाग कविना २३ श्लोकप्रमाण 'चन्द्रदूत' नामना यमकमय खण्डकाव्यनो परिचय नथी अपायो, तेथी त्यां ५ ज काव्योनो उल्लेख मळे छे.

आ शान्तिसूरि न्यायावतारवार्त्तिककार शान्तिसूरिथी अभिन्न छे अने तेमनो सत्तासमय वि.सं. १०५०-११७५ वच्चे छे अे वात पं. श्रीदलसुख मालवणियाअे न्यायावतारवार्तिकवृत्तिनी प्रस्तावनामां (प्र. सरस्वती पुस्तक भण्डार, अमदावाद, २००२) प्रमाणभूत रीते साबित करी आपी छे.

वृन्दावनकाव्यनी श्रीशान्तिसूरिविरचित वृत्तिनी वि.सं. १५१६मां लखायेली अेक हस्तप्रतनो उल्लेख जै.सं.सा.इ. - भाग-२, प्रकरण ३५मां छे. पण ते प्रत उपलब्ध न थतां, हंसविजयजी जैन शास्त्रसंग्रह-वडोदरा, डा.१, प्र.नं. १०, पृ. ८ - ए हस्तप्रत परथी प्रस्तुत सम्पादन करवामां आव्युं छे. प्रत अनुमानतः २०मा सैकामां लखायेली छे. प्रतमां अशुद्धिओ घणी छे, पण अर्थसङ्गतिने आधारे यथामति शुद्ध करीने अत्रे सम्पादन कर्युं छे. ज्यां सहेज पण संशय लाग्यो त्यां ज कौंसमां शुद्ध पाठ सूचव्या छे, ते सिवाय सीधा मूळ वाचनामां ज सुधारा कर्या छे.

कैलाससागरसूरि-ज्ञानमन्दिर-कोबामां तपास करतां श्रीशान्तिसूरिरचित ६ काव्योनी टीकामांथी वृन्दावनकाव्य सिवायनी टीकाओ प्रगट जणाई छे.

संस्कृतसाहित्यरसिकोने आ काव्य अने तेनी सुगम टीका आह्लाद आपशे तेवी खातरी सह...

*

## वृन्दावनकाव्यम् - सटीकम्

वर्धमानं सुधामानं देवेन्द्रैः कृतसत्क्रियम् ।
वर्धमानं महामानं नत्वा देशितसत्क्रियम् ॥१॥

वृन्दावनादिकाव्यानां यमकैरतिदुर्विदाम् ।
वक्ष्ये मन्दप्रबोधाय पञ्चानां वृत्तिमुत्तमाम् ॥२॥

आदौ तावत् काव्यकरणे प्रवर्तमान **उग्रसेनतनयो मानाङ्को** मङ्गल-प्रतिपादनाय शिष्टसमाचारपरिपालनार्थं चेष्टदेवतायै विष्णवे नमस्कारमाह -

*वरदाय नमो हरये पतति जनो यं स्मरन्नपि न मोहरये ।*
*बहुशश्चक्रन्द हता मनसि दितिर्येन दैत्यचक्रं दहता ॥१॥*

तस्मै **हरये**- विष्णवे **नमो**ऽस्तु- नमस्कारो भवतु । कीदृशाय ? **वरदाय** । वरं- वाञ्छितार्थं सेवकाय ददातीति वरदस्तस्मै । **यं** हरिं **जनो**-लोको **न पतति**- न गच्छति । क्व ? **मोहरये** । अज्ञानवेगे मूढो न भवती-त्यर्थः । किं कुर्वन् ? **स्मरन्नपि**- ध्यायन्नपि, तिष्ठतु पूजादिकम् ।

**येन** हरिणा **हता**- दुःखिता सती **मनसि**- चित्ते **चक्रन्द**-आक्रन्दितवती । **कथम्** ? **बहुशो**ऽतिशयेन । **दितिर्दा**नवमाता । किं कुर्वता ? **दहता**- भस्मसात्

कुर्वता । किं तत् ? **दैत्यचक्रं**- दैत्यवृन्दम् । अवश्यमेव हि पुत्रविनाशे मातुर्दुःखाद् रोदनं भवतीति ॥१॥

*स्वमिव भुजङ्गवि शेषं व्युपधाय स्वपिति यो भुजङ्गविशेषम् ।*
*नवपल्लवसमकरया श्रियोर्मिपङ्क्त्या च सेवितः समकरया ॥२॥*

तथा **यो** हरिः **स्वपिति**- शेते । क्व ? **गवि**- समुद्रजले । किं कृत्वा ? **व्युपधाय**- गण्डोपधानीकृत्य । कम् ? **भुजङ्गविशेषं**- सर्पराजम् । किंनामानम् ? **शेषं**- शेषाभिधानम् । कमिव ? **भुजमिव**- बाहुमिव । स्थूलत्वाद् दीर्घत्वाच्च । किम्भूतम् ? **स्वमात्मीयम्** । कथम्भूतो हरिः ? **सेवित**- आश्रितः । कया ? **श्रिया**- लक्ष्म्या । कीदृश्या ? **नवपल्लवसमकरया** । नवपल्लवैः समौ करौ यस्याः सा नवपल्लवसमकरा, तया । रक्तत्वेन कोमलत्वेन च नूतनकिसलयतुल्यहस्तया । न केवलं श्रिया सेवितः, **ऊर्मिपङ्क्त्या च**- कल्लोलमालया च । कीदृश्या ? **समकरया** । सह मकरैर्जलचरजन्तुविशेषैर्वर्तते या सा समकरा, तया समकरया ॥२॥

*येन च बलिरसुरोऽधः क्षितेरवस्थापितः सुरैरसुरोधः ।*
*पृथुकः सन्निभवदनः चिक्षेप च यः सरोजसन्निभवदनः ॥३॥*

तथा **येन च** हरिणा **क्षितेर्भूमेरधोऽ**धस्ताद**वस्थापितो**- निहितः । कोऽसौ ? **असुरो**- दानवः । किंनामा ? **बलिः** । कीदृशः ? **सुरैर्देवैः** शक्रादिभि**रसुरोधो** न सुखेन रुध्यते- ध्रियते निवार्यते वाऽतिबलत्वादित्यसुरोधः ।

तथा **यो हरिश्चिक्षेप च**- प्रेरितवान् । किं तत् ? **अनः**- शकटम् । क इव ? **इभवत्**- करीव । यथा करी शकटं क्षिपति, तथा शकटरूपमसुरं क्षिप्तवानित्यर्थः । किम्भूतः सन् ? **पृथुको**- बालः **सन्** । तथा **सरोजसन्निभवदनः**- पद्मतुल्यमुखः ।

चकारः सर्वत्र समुच्चये । श्लोकत्रयेणाऽऽदिकुलकम् ॥३॥

साम्प्रतं हरिभ्रातृत्वेन पूज्यत्वादत्र काव्ये वर्णनीयत्वाच्च बलभद्रस्य स्तुतिमाह -

*स्तौमि च लाङ्गलवन्तं देवं यः संयुगे चलाङ्गलवं तम् ।*
*कपिमकरोदसुरहितं द्विविदं दृढमुष्टिताडनादसुरहितम् ॥४॥*

**तं देवं**- सुरं **स्तौमि**- वन्दे । किमभिधानम् ? **लाङ्गलवन्तम्** । लाङ्गलं- हलं विद्यते यस्याऽसौ लाङ्गलवान्, तं बलभद्रम् । **यो हली संयुगे**- सङ्ग्रामे**ऽकरोत्**- चकार । कम् ? **कपिं**- वानररूपं दानवम् । किमभिधानम् ? **द्विविदं**- द्विविदनामानम् । कथम्भूतमकरोत् ? **असुरहितम्** । असुभिः- प्राणै रहितं- त्यक्तं, निर्जीवमित्यर्थः । कीदृशम् ? **असुरहितम्** । असुरेभ्यो - दानवेभ्यो हितोऽनुकूलोऽसुरहितस्तम् । तथा **चलाङ्गलवम्** । चलाश्चञ्चलाः सव्यापारा युद्धक्षमा वा अङ्गलवा- हस्तपादादयो यस्य स चलाङ्गलवस्तम् । कस्मादसुरहितमकरोत् ? **दृढमुष्टिताडनाद्**- निबिडमुष्टिप्रहाराद् हेतोः ॥४॥

*आपानपरम्परया भेजे यं रेवती जितपरं परया ।*
*बिभ्रतमालानाभौ बाहू मग्नकुसुमाश्च माला नाभौ ॥५॥*

तथा **यं** बलभद्रं **रेवती** बलभद्रभार्या **भेजे**- सिषेवे । कया ? **आपानपरम्परया**- मधुपानसन्तत्या । कीदृश्या ? **परया**- उत्कृष्टया । कीदृशं बलम् ? **जितपरम्** । जिता- अभिभूताः परे- शत्रवो महाबलत्वाद् येन स यथोक्तस्तम् । किं कुर्वन्तम् ? **बिभ्रतं**- धारयन्तम् । कौ ? **बाहू**- भुजौ । कीदृशौ ? **आलानाभौ** । आलानस्येवाऽऽभा- छाया-शोभा ययोस्तौ तथोक्तौ । हस्तिबन्धनस्तम्भतुल्यौ प्रलम्बत्वात् स्थूलत्वाच्च । तथा **मालाश्च**- स्रजश्च बिभ्रन्तम् । कीदृशीः ? **मग्नकुसुमाः**- प्रविष्टपुष्पाः । क्व? **नाभौ** ॥५॥

*यो रूढमदारुणया तन्वा प्रणतं प्रति द्विषमदारुणया ।*
*कर्षितदानवकुलया विबभौ गन्धविजितेभदानबकुलया ॥६॥*

यश्च बलो **विबभौ**- विशेषेण शुशुभे । कया ? **तन्वा**- शरीरेण । कीदृश्या ? **रूढमदारुणया** । रूढमदेन- पुरातनमद्येनाऽऽरुणा- रक्ता निरन्तरं पानात् सा तथोक्ता तया । तथा**ऽदारुणया**- अरौद्रया । कं प्रति ? **द्विषं प्रति**- शत्रुं लक्ष्यीकृत्य । कीदृशम् ? **प्रणतं** - प्रणामपरम् । तथा **कर्षितदानवकुलया** । कर्षितं- विनाशितं दानवकुलमसुरवृन्दं यया सा तथोक्ता तया । तथा **गन्धविजितेभदानबकुलया** । इभदानं च करिमदो बकुलानि च बकुलपुष्पाणि । गन्धेन- आमोदेन विजितान्यभिभूतानि इभदानबकुलानि यया सा तथोक्ता तया । मदगन्धवासितत्वात् स्वभावसुगन्धित्वाच्च ॥६॥

अधुना पितृभक्त्या स्वकीयपितृगुणवर्णनमाह -

*ग्रहपतिरिव हिमहीनः कान्त्याऽभूदुग्रसेन इति हि महीनः ।*
*प्रकृतिभिररिहेतीह स्वयंवृतः संहताभिररिहेतीहः ॥७॥*

**इह**- जगति **महीनो**- राजाऽ**भूद्**- बभूव । किंनामा ? **उग्रसेन** इत्युग्रसेनाभिधानो **हिर्व्यक्तम्** । कीदृश इव ? **ग्रहपतिरिव**- चन्द्रतुल्यः । कया ? **कान्त्या**- कान्तत्वेन । कीदृशो ग्रहपतिः ? **हिमहीनः**- तुषाररहितः ।

कथम्भूत उग्रसेनः ? [इह] **स्वयंवृत**- आत्मनैव परिवारितो बहुगुणत्वात् । काभिः ? **प्रकृतिभि**रमात्यादिभिः । कीदृशीभिः ? **संहताभिः**- परस्परसम्बद्धाभिः । कुतः स्वयंवृतः ? **अरिहेति** । अरीन्- शत्रून् हन्तीत्यरिहेति हेतोः । तथा **अरिहेतीहः** । अरानि(णि) विद्यन्तेऽस्याऽरि- चक्रं, तद् हेति- प्रहरणं यस्य सोऽरिहेतिर्हरिस्तस्यैवेहा- चेष्टा यस्य स तथोक्तो विष्णुसमव्यापार इत्यर्थः । यद्वाऽरीणि च तानि हेतयश्च अरिहेतयस्तैरीहते- चेष्टते इति अरिहेतीहश्चक्र-प्रहरणव्यापारः ॥७॥

*बलभिदरीभागानां जेता विन्ध्यर्क्षवद्दरीभागानाम् ।*
*शौक्ल्यादाशार्हस्य प्रभवो यशसः समश्च दाशार्हस्य ॥८॥*

कीदृशो यो ? **बलभिद्** । बलं- सामर्थ्यं भिनत्ति- विदारयतीति बलभित्- शक्तिनाशकः । केषाम् ? **अरीभागानाम्** । अरीभाः- शत्रुगजास्त एवाऽगाः- पर्वता महत्त्वाद् दुर्जेयत्वाच्चाऽरीभागास्तेषाम् । तथा **जेता**- पराभविता । केषाम् ? **विन्ध्यर्क्षवद्दरीभागानाम्** । विन्ध्यश्च ऋक्षवांश्च विन्ध्यर्क्षवन्तौ गिरिविशेषौ । तयोर्दरीभागाः- कन्दरप्रदेशा विषमत्वाद् दुर्जेयास्तेषां तत्रस्थारिलोकानाम् ।

तथा **प्रभवो**- जनकः । कस्य ? **यशसः**- कीर्तेः । कीदृशस्य ? **आशार्हस्य** । आशा- दिशोऽर्हति- पूजयति मण्डयति वाऽऽशार्हः तस्य । कुतः ? **शौक्ल्यात्**- शुभ्रत्वात् ।

तथा **समश्च**- तुल्यश्च । कस्य ? **दाशार्हस्य**- विष्णोः ॥८॥

*यो भोक्तेव सुधाया वर्णकविः शासिता च यो वसुधायाः ।*
*यस्य परामुदधीनां तटेषु कीर्तिं प्रचक्षते मुदधीनाम् ॥९॥*

यश्चोग्रसेनः **शासिता**- रक्षकः । कस्या? **वसुधायाः**- पृथिव्याः । क

इव ? **भोक्तेव** । कस्याः ? **सुधायाः** । अमृतस्य देव इत्यर्थः ।

तथा **वर्णकवि**रचुन्दिता(निन्दिता?)र्थकर्ता **यस्य चोग्रसेनस्य कीर्ति**-यशः **प्रचक्षते** । कीर्तिवादनंवा(कीर्तिर्वा दानम्?) । कीदृशीम् ? **परां**-प्रकृष्टाम्। केषु ? **तटेषु**- रोधःसु । केषाम् ? **उदधीनां**- समुद्राणाम् । किम्भूताना(ताम्) ? **मुदधीनाम्** । मुदो- हर्षस्याऽऽधीना- आयत्ता मुदधीना तां, हर्षयुक्तामित्यर्थः । समुद्रपर्यन्ता यस्य दानं कीर्तिर्वेत्यर्थः ॥९॥

*भरत इव विभावसवः सर्वेषां प्राणिनामथ विभावसवः ।*
*यस्मिन् वसुधामवति स्थिरा बभूवुः समाश्च वसुधामवति ॥१०॥*

तथा **यस्मिन्नुग्रसेने वसुधां**- पृथिवीम**वति**- रक्षति सति । कीदृशे ? **विभौ**- प्रभौ । **विभावसवो**- अग्नयः **स्थिरा**- अचला **बभूवु**र्नित्यज्वलिता इत्यर्थः । **अथा**ऽनन्तर**मसवः**- प्राणाश्च स्थिरा बभूवुः । अकाले न मृत्युरित्यर्थः । तथा **समाश्च**- वर्षाणि च स्थिरा बभूवुः- परिपूर्णाः सञ्जाताः । न दिनापातादूना इत्यर्थः । यदि वा असवः कीदृशाः ? **समाः** । सह माभिर्लक्ष्मीभिर्वर्तन्ते इति समाः । अयमर्थः- असवो लक्ष्म्यश्च स्थिरा- अचञ्चलाः सञ्जाताः । केषाम् ? **सर्वेषां प्राणिनाम्**- सकलजन्तूनाम् । यागादिधर्मकरणशीलत्वात् । कस्मिन्निव ? **भरत इव** । यथा भरतचक्रवर्तिनि प्रभावग्न्यादयः सर्वे सर्वजन्तूनां स्थिरा बभूवुरित्यर्थः । कीदृशे भरते उग्रसेने च ? **वसुधामवति** । वसूनि च रत्नानि धाम- तेजश्च वसुधामानि । तानि विद्यन्ते यस्य स तथोक्तस्तस्मिन्निति ॥१०॥

*अनुकृत्य रघो राज्ञः प्रत्याख्यातासनः प्रभुरघोराज्ञः ।*
*योगिभिरित्यस्तमितः केशवमाप्नोमि नाथमित्यस्तमितः ॥११॥*

यश्चोग्रसेनो**ऽस्तमितः**- विनष्टो मृत इत्यर्थः । कस्माद्धेतोः ? **तं केशवं नाथं**- हरिस्वामिन**माप्नोमी**ति हेतोः । यः केशव **इत्यः**- ज्ञेयः । कैः ? **योगिभि**र्ध्यानारूढैः । किम्भूतः सन्नुग्रसेन ? **इतो**- गतः, संसारादिति गम्यते। **इतो**ऽस्मात् स्थानाद् वा । कीदृशः ? **प्रत्याख्यातासनः**- त्यक्तभोजनः । **तथाऽघोराज्ञो**- अरौद्रशासनः । तथा **प्रभुः**- स्वामी । किं कृत्वाऽस्तमितः ? **अनुकृत्य**- अनुकारं कृत्वा, प्रजापालनादिभिः सदृशो भूत्वा । कस्य ? **राज्ञो**-**नृपस्य** । किंनाम्नः ? **रघोः**- दिलीपसूनोः ॥११॥

*तस्येयमकार्येभ्यश्च्युतेन तनयेन रचितयमकाऽऽर्येभ्यः ।*
*दत्ता वाक् स्वा कृतिना मानाङ्केन हरिसंश्रया स्वाकृतिना ॥१२॥*

**तस्योग्रसेनस्य** राज्ञस्**तनयेन**- पुत्रेण **दत्ता**- समर्पिता । काऽसौ ? **वाक्**- काव्यरूपा वाणी । किम्भूता ? **स्वा**- आत्मीया । तथे**यं** प्रत्यक्षा । तथा **हरिसंश्रया**- हरिनायकाधारा । कीदृशेन तनयेन ? **कृतिना**- पण्डितेन। तथा **मानाङ्केन**- मानचिह्नेन । तथा **स्वाकृतिना**- शोभनाकारेण । सुरूपेणेत्यर्थः । तथा **च्युतेन**- नष्टेन । केभ्यः ? **अकार्येभ्यः** । परद्रोहाद्यकार्यरहितेनेत्यर्थः । केभ्यो दत्ता ? **आर्येभ्यः**- शिष्टेभ्यः । वाक् कीदृशी ? **रचितयमका**- कृतसदृशाक्षरन्यासा ॥१२॥

*अथ जग्मतुरुरु मत्तौ वयसा वृन्दावनान्तरं रुरुमत् तौ ।*
*हरिराहितकुमुदसितः स्निग्धतराङ्गस्तथा हली कुमुदसितः ॥१३॥*

**अथा**ऽनन्तरं **तौ**- हरिबलौ **वृन्दावनान्तरं**- वृन्दावनाभिधानवनमध्यं **जग्मतुः**- गतवन्तौ । कीदृशम् ? **उरु**- विस्तीर्णम् । तथा **रुरुमत्** । रुरवो-मृगविशेषा विद्यन्ते यस्मिन् तत् तथोक्तम् । तौ कीदृशौ **मत्तौ**- मदयुक्तौ । केन ? **वयसा**- तारुण्यावस्थया । कीदृशो हरिः ? कीदृशश्च बलः ? **हरिः**- विष्णु**राहितकुमुत्** । आहिसात्कृता कोः- पृथिव्या मुत्- हर्षो येन स तथोक्तः । तथाऽ**सितः**- कृष्णः । तथा **स्निग्धतराङ्गः** । स्निग्धतरमतिशयस्निग्धं दीप्तिमदङ्ग-शरीरं यस्य स तथोक्तः । तथा **हली**- बलः **कुमुदसितः**- कैरवशुभ्रः ॥१३॥

*उदधिपयोनिर्घोषं तत्र निवेश्याऽच्युतोऽपयोनिर्घोषम् ।*
*अवि(व)चिन्तितकंसबलश्चचार भेजे च यामुनं कं सबलः ॥१४॥*

**अच्युतो**- हरिश्**चचार**- बभ्राम । क्व ? **तत्र**- वृन्दावनमध्ये । न केवलं चचार, **भेजे च**- सिषेवे च । किं तत् ? **कं**- जलम् । किम्भूतम् ? **यामुनं**- कालिन्दीसत्कम् । कथम्भूतोऽच्युतः? **अवि(व)चिन्तितकंसबलः** । अवि(व)चिन्तितमगणितं कंसस्याऽसुरस्य बलं- सैन्यं सामर्थ्यं वा येन स तथोक्तः । तथा **सबलो**- बलभद्रसहितः । तथा **अपयोनिः** । अपगता योनिः- कारणं यस्य स तथोक्तः । किं कृत्वा चचार ? **निवेश्य**- स्थापयित्वा । कम् ? **घोषं**- गोकुलम् । कीदृशम् । **उदधिपयोनिर्घोषम्** । उदधिपयस इव समुद्रजलस्येव निर्घोषः- शब्दो मथ्यमानदध्यादेर्यस्मिन् तत् तथोक्तम् ॥१४॥

*प्रियसुहृदामोदरयोर्ललतोरथ रौहिणेयदामोदरयोः ।*
*कृतपशुवृन्दावनयोर्घर्मः क्षयमाप दयितवृन्दावनयोः ॥१५॥*

**अथ**- अनन्तरं **घर्मो**- ग्रीष्मः **क्षयं**- विनाश**माप**- लेभे । कयोः ? **रौहिणेय-दामोदरयोः**- बलभद्र-कृष्णयोः । कीदृशयोः ? **प्रियसुहृदामोदरयोः**। प्रियसुहृदां- वल्लभमित्राणामामोदं- समन्तो (समन्ततो) हर्षं रातौ दत्तस्तौ तथोक्तौ तयोः । किं कुर्वतोः ? **ललतोः**- क्रीडतोः । तथा **कृतपशुवृन्दावनयोः** । कृतं पशुवृन्दस्य- गोसङ्घातस्याऽवनं- रक्षणं यकाभ्यां तौ तथोक्तौ तयोः । तथा **दयितवृन्दावनयोः** । दयितं- प्रियं वृन्दावनं- वनविशेषो ययोस्तौ तथोक्तौ तयोः ॥१५॥

*क्षोभमगादभ्राणां स्तनितैर्विद्युत्वतामगादभ्राणाम् ।*
*मुनिरपि नीरागमनाः सरितश्चाऽऽसन् प्रवृत्तनीरागमनाः ॥१६॥*

**मुनिरपि**- यतिरप्यास्तां सरागमनाः । **क्षोभं**- चलन**मगात्**- जगाम । सकामो बभूवेत्यर्थः । कीदृशः ? **नीरागमनाः** । नीरागं- गतरागं मनः- चित्तं यस्य स तथोक्तः । कैः ? **स्तनितैः**- गर्जितैः । केषाम् ? **अभ्राणां**- मेघानाम् । कीदृशानाम् ? **विद्युत्वतां**- सतडिताम् । तथा **अगादभ्राणाम्**, अगा इव- गिरय इवाऽदभ्रा- महान्तोऽगादभ्रास्तेषाम् । न केवलं मुनिः क्षोभमगात्, **सरितश्च**- नद्यश्चाऽऽ**सन्**- बभूवुः । कीदृश्यः ? **प्रवृत्तनीरागमनाः**- प्रसृतजलप्रवाहाः ॥१६॥

*ऐन्द्रं कं दर्पस्य प्रथमोहेतुर्बभूव कन्दर्पस्य ।*
*स्त्रीहृदयान्यभिनदतः स शरैः प्राप्य सुहृदो घनानभिनदतः ॥१७॥*

**बभूव**- आसीत् । किं तत् ? **कं**- जलम् । [कीदृशम् ? **ऐन्द्रम्**- इन्द्रसम्बन्धि ।] किम्भूतम् ? **हेतुः**- कारणम् । कस्य ? **दर्पस्य**- मदस्य । कस्य ? **कन्दर्पस्य**- कामस्य । कीदृशो हेतुः ? **प्रथम**- आद्यः । **अतो**- अस्माद्धेतोः । तथाऽ**भिनदत्**- विदारितवान् । कः ? **स**- कन्दर्पः । कानि? **स्त्रीहृदयानि**- वनितानां मनांसि । **शरैः**- बाणैः । किं कृत्वा ? **प्राप्य**- आसाद्य । कान् ? **मेघान्**- घनान् । कीदृशः ? **सुहृदो**- मित्राण्युपकारित्वात् । किं कुर्वतः ? **अभिनदतो**- ध्वनतः ॥१७॥

*विद्युद् गौरी हावानकृतेव घनेष्वभूच्च गौरीहावान् ।*
*सुलभबलाकायेषु ग्लपितचिरप्रोषिताबलाकायेषु ॥१८॥*

**विद्युत्**- तडित् । **गौरी**- सुवर्णवर्णा । **हावान्**- मुखविकारान् विलासान् वा । **अकृतेव**- चकारेव । केषु ? **घनेषु**- मेघेषु । न केवलं विद्युद् हावान् चकार, **गौश्च** जातित्वाद् वृषभ इत्यर्थः, **ईहावान्**- चेष्टावानभूद्- बभूव। कीदृशेषु मेघेषु ? **सुलभबलाकायेषु** । सुलभः- सुप्रापो बलाकानां- पक्षिविशेषाणा**माय**- आगमो लाभो वा येषु ते तथोक्तास्तेषु । तथा **ग्लपित-चिरप्रोषितबलाकायेषु** । ग्लपिताः- खेदिताश्चिरं प्रोषिताबलानां- गतभर्तृस्त्रीणां कायाः- शरीराणि यैस्ते तथोक्तास्तेषु ॥१८॥

*जात्या सज्जालकया यूथिकया चाऽऽप्तयुवतिसज्जालकया ।*
*कमलानि ससर्जाऽऽभ्यां भ्रमरः कृष्टो बलादिति ससर्जाभ्याम् ॥१९॥*

**भ्रमरः**- अलिः **ससर्ज**- त्यक्तवान् । कानि ? **कमलानि**- पद्मानि । किम्भूतः ? **कृष्ट**- आकृष्टः सन् । कथम् ? **बलाद्**- वेगात् । काभ्याम् ? **आभ्यां**- जातियूथिकाभ्याम् । कीदृशीभ्याम् ? **ससर्जाभ्यां**- सर्जवृक्षसहिताभ्याम् । कस्मादिति हेतोः । यतो **जात्या**, कीदृश्या ? **सज्जालकया** । सन्ति- शोभनानि जालकानि- गुच्छानि यस्याः सा तथोक्ता [तया] । तथा **यूथिकया च** कीदृश्या ? **आप्तयुवतिसज्जालकया** । आप्ताः- प्राप्ता युवतीनां- स्त्रीणां सज्जाः- प्रगुणा अलकाः- कुटिलकेशा यया सा तथोक्ता तया ॥१९॥

*व्याप्य दिशो दश निभृतः क्षणमपि तस्थौ न शासनादशनिभृतः ।*
*संशमितागबलस्य ध्वनन् घनौघः समप्रभो गवलस्य ॥२०॥*

**क्षणमपि**- स्तोककालमपि **घनौघो**- मेघसङ्घातो **न तस्थौ**- न स्थितः । किं कुर्वन् ? **ध्वनन्**- गर्जन् । किम्भूतो न तस्थौ ? **निभृतो**- निःशब्दः । कस्मात् ? **शासनात्**- आदेशात् । कस्य ? **अशनिभृतः**- इन्द्रस्य । किं कृत्वा ? **ध्वनन् व्याप्य**- आच्छाद्य । का? **दिशः**- ककुभः । कियतीः ? **दश** । यद्वा **निभृतो**- नितरां जलपूर्णः । कीदृशोऽशनिभृतः ? **संशमितागबलस्य** । सम्यक् शमितम्- अपनीतमगानां- गिरीणां बलं- सामर्थ्यं पक्षच्छेदाद् येन स तथोक्तस्तस्य । कीदृशो घनौघः ? **समप्रभः**- तुल्यवर्णः । कस्य ? **गवलस्य**- महिषशृङ्गस्य, कृष्ण इत्यर्थः ॥२०॥

*भ्रमरी दश कदम्बरजस्त्वमितीव वदन(न्) स्वनादशकदम्बरजः ।*
*हन्तुं विभ्रमरहितां नलिनीं पथिकाङ्गनां च विभ्रमरहिताम् ॥२१॥*

**अम्बरजो**- मेघोऽ**शकत्**- समर्थोऽभूत् । किं कर्तुम् ? **हन्तुं** विनाशयितुम्। काम् ? **नलिनीं**- पद्मिनीम् । कीदृशीम् ? **विभ्रमरहिताम्** । वयश्च पक्षिणो हंसादयो भ्रमराश्च भृङ्गास्तेभ्यो हितामनुकूलां, छायामधुदानादिना। तथा **पथिकाङ्गनां** च- गतभर्तृकां च, हन्तुमशक्यत्वात् । कीदृशीम् ? **विभ्रमरहितां**- विलासहीनाम् । किं कुर्वन्निव ? **धुव(वद)न्निव** । कस्माद् ? **स्वनात्**- शब्दात् । किं वदन् ? **इति**- एतत् - हे **भ्रमर**!- भृङ्ग!, त्वं **दश**- भक्षस्व । किं तत् ? **कदम्बरजः**- कदम्बपुष्परागम् ॥२१॥

*ज्योत्स्नाऽलं घनमलिना न बभौ क्रियते स्म कुटजलङ्घनमलिना ।*
*बलवानवपू रोहन् हृद्यास नदीतटांश्च नवपूरोऽहन् ॥२२॥*

**ज्योत्स्ना**- चन्द्रकान्तिर्**घनमलिना**- मेघकृष्णा सती **अलमत्यर्थं न बभौ**- न शुशुभे । तथा **क्रियते स्म**- कृतम् । किं तत् ? **कुटजलङ्घनम्**। कुटजपुष्पाणां लङ्घनमतिक्रमणं गमनं वा । केन ? **अलिना**- भ्रमरेण ।

तथा **अवपुः**- अनङ्ग **आस**- बभूव । क्व ? **हृदि**- मनसि । किं कुर्वन् ? **रोहन्**- प्रादुर्भवन् च तन्वा । कीदृशः ? **बलवान्**- शक्तिमान् ।

तथा **नवपूरो**- नवजलप्रवाहोऽ**हन्**- हतवान्- पातितवान् । कान् ? **नदीतटान्**- सरिद्रोधांसि । **चः** समुच्चये ॥२२॥

*शिखिषु समुत्सु कमनसो गतिहरमुज्झति च खे समुत्सुकमनसः ।*
*व्यमुचन्नपवनजवना वापीर्हंसाः स्थिताश्च न पवनजवनाः ॥२३॥*

**व्यमुचन्**- त्यक्तवन्तः । के ? **हंसाः**- चक्राङ्गाः । का ? **वापीः**- सरसीः । कीदृशीः ? **अपवनजवनाः** । वने- जले जातानि वनजानि- पद्मानि, तेषां वनं- खण्डो वनजवनम् । अपगतं- भ्रष्टं वनजवनं- पद्मखण्डो यासु तास्तथोक्तास्ताः । न केवलं व्यमुचन्, [न] **स्थिताश्च**- न स्थितिं कृतवन्तः । कीदृशाः ? **पवनजवना**- वायुसमवेगाः । केषु सत्सु ? **शिखिषु**- मयूरेषु । कीदृशेषु ? **समुत्सु**- सहर्षेषु । तथा **खे**- आकाशे सति । किं कुर्वति ? **उज्झति**- मुञ्चति । किं तत् ? **कं**- जलम् । कीदृशम् ? **गतिहरं**- गमनविनाशि।

कस्य ? **अनसः**- शकटस्य । हंसाः कथम्भूताः ? **समुत्सुकमनसः**- उत्कण्ठितचित्ताः ॥२३॥

*शब्दोऽनादेयानां कलुषतया नो शशाम नादेयानाम् ।*
*फेनो वा नीराणामाकृष्टोभयतटान्तवानीराणाम् ॥२४॥*

**नो शशाम**- नोपशमं जगाम । कोऽसौ ? **शब्दो**- नादः । तथा **फेनो वा**- डिण्डीरश्च । केषाम् ? **नीराणां**- जलानाम् । कीदृशानाम् ? **नादेयानाम्**। नद्यां भवानि नादेयानि तेषां सरितः सत्कानाम् । तथा **अनादेयानाम्**- अग्राह्याणाम्। कया ? **कलुषतया**- मलिनतया । तथाऽऽ**कृष्टोभयतटान्तवानीराणाम्** । आकृष्टाः- पातिता उभयतटान्तेभ्यो- रोधद्वयान्तेभ्यो वानीरा- वेतसा यैस्तानि तथोक्तानि तेषाम् ॥२४॥

*प्राप्य सखद्योतायां निशि विद्युज्जितमरुत्सखद्योतायाम् ।*
*प्रियतमसदनं गेहादबला भयमुत्ससर्ज सदनङ्गेहा ॥२५॥*

**अबला**- वनिता **भयं**- त्रासमुत्**ससर्ज**- तत्याज । किं कृत्वा ? **प्राप्य**- आसाद्य । किं तत् ? **प्रियतमसदनम्**- अभीष्टगृहम् । कस्माद् ? **गेहात्**- स्वगृहात् । किम्भूता सती ? **सदनङ्गेहा सती** । विद्यमानाऽनङ्गेहा- कामचेष्टा यस्याः सा तथोक्ता । कस्याम् ? **निशि**- रात्रौ । कीदृश्याम् ? **सखद्योतायाम्**। सह खद्योतैः- ज्योतिरिङ्गणैर्वर्तते या सा तथोक्ता तस्याम् । तथा **विद्युज्जितमरुत्सखद्योतायाम्** । विद्युता- तडिता जितो- अभिभूतो मरुत्सखस्य- अग्नेर्द्योतो- दीप्तिर्यस्यां सा तथोक्ता तस्याम् ॥२५॥

*पर्वतकटकेशानां नीपरजःकपिलकुम्भकटकेशानाम् ।*
*कुञ्जनदीनगजानां हर्षो जज्ञे महानदीनगजानाम् ॥२६॥*

**हर्षो जज्ञे**- प्रमोदो जातः । कीदृशः ? **महान्**- गुरुः । केषाम् ? **अदीनगजानां**- सतेजःकरिणाम् । कीदृशाम् ? **पर्वतकटककेशानां**- गिरिप्रस्थस्वामिनाम् । तथा **नीपरजःकपिलकुम्भकटकेशानाम्** । नीपरजसा- कदम्बरेणुना कपिलाः- पिङ्गलाः कुम्भकटकेशाः- शिरःपिण्डकपोलवाला येषां ते तथोक्तास्तेषाम् । तथा **कुञ्जनदीनगजानाम्** । कुञ्जानि च गह्वराणि, नद्यश्च सरितो, नगाश्च पर्वतास्ते तथोक्तास्तेषु जाताः कुञ्जनदीनगजास्तेषाम् ॥२६॥

*विविधोपलराशिखरं पिदधे गोवर्धनं तृणैराशिखरम् ।*
*कालोऽगं धारावानकरोत् कुटजशिखिनां च गन्धारावान् ॥२७॥*

**अगं**- गिरिम् । किमभिधानम् ? **गोवर्धनं**- गोवर्धननामानम् । **कालः** कर्ता **पिदधे**- आच्छादितवान् । कीदृशः कालः ? **धारावान्** । धारा विद्यन्तेऽस्य धारावान् । जलवृष्टिप्रपातयुक्तो वर्षाकाल इत्यर्थः । कैः ? **तृणैः** । कथं पिदधे ? **आशिखरं**- शिरःपर्यन्तम् । कथम्भूतमगम् ? **विविधोपलराशिखरम्** । नानाविधप्रस्तरकूटकठोरम् । न केवलं पिदधे, **अकरोच्च** । कान् ? **गन्धारावान्** । गन्धाश्चाऽऽरावाश्च तानामोदशब्दान् । केषाम् ? **कुटजशिखिनाम्** । कुटजानां गन्धान् मयूराणां च शब्दानित्यर्थः ॥२७॥

*कणिकाभिरपां सुखरा वृन्दावनमारुता ववुरपांशुखराः ।*
*यमुना नवमुदकपटं भेजे व्रजलोकमाश्रिता मुदकपटम् ॥२८॥*

**वृन्दावनमारुता**- वृन्दावनस्य वाता **ववुः**- वान्ति स्म । कीदृशाः ? **सुखराः** । सुखं रान्ति- ददतीति सुखराः- शर्मदाः । काभिः ? **कणिकाभिः**- लेशैः । कासाम् ? **अपां**- जलानां, शीतलत्वात् । तथा **अपांशुखराः** । न पांशुभिः खराः- कठोराः ।

**यमुना**- कालिन्दी **नवं**- नूतन**मुदकपटं**- जलमेव वस्त्रं **भेजे**- सिषेवे । तथा **मुद्**- हर्ष **आश्रिता**- आश्लिष्टा । कम् ? **व्रजलोकं**- गोकुलजनम् । कीदृशम् ? **अकपटम्** । न विद्यते कपटं- माया यस्य स तथोक्तस्तमृजुमित्यर्थः । व्रजलोको हृष्टो बभूवेत्यर्थः ॥२८॥

*अतपनवसुदे वसु तौ वज्रस्य साभ्रे ततोऽह्नि वसुदेवसुतौ ।*
*अमृतसमधुनीपवनं वृन्दावनमविशतां समधुनीपवनम् ॥२९॥*

**ततो**ऽनन्तरं **तौ वसुदेवसुतौ**- विष्णुबलौ **वृन्दावनमविशतां**- प्रविष्टौ । कीदृशम् ? **समधुनीपवनम्** । समधूनि- पुष्परससहितानि नीपानां- कदम्बानां वनानि यत्र तत् तथोक्तम् । तथा**ऽमृतसमधुनीपवनम्** । अमृतेन- पीयूषेण **समः**- समानः शीतत्वात् सुरभित्वाच्च धुनीपवनो- नदीवातो यत्र तत् तथोक्तम् । कस्मिन् ? **अह्नि**- दिवसे । कीदृशे ? **साभ्रे**- समेघे । तथा**ऽतपनवसुदे** । न तपनस्य- आदित्यस्य वसून्- रश्मीन् ददाति मेघावृतत्वादिति तत् तथोक्तं

तस्मिन् । रविकिरणरहिते इत्यर्थः । तौ कीदृशौ ? **वसु** । द्रव्यमुपभोग्यत्वात् प्रसिद्धत्वाद् वा । यद्वा रत्नं प्रधानत्वात् । कस्य ? **व्रजस्य**- गोकुललोकस्य ॥२९॥

*शिखिसर्वस्वधरस्य द्वे प्रियतां जग्मतुर्हरेः स्वधरस्य ।*
*भ्रमरकदम्बकरवहा वेणुः प्रावृट् तथा कदम्बकरवहा ॥३०॥*

**द्वे**- वेणु-प्रावृषौ **प्रियतां जग्मतुः**- उभे प्रिये बभूवतुः । कस्य ? **हरेः**- विष्णोः । कीदृशस्य ? **स्वधरस्य**- शोभनौष्ठस्य । तथा **शिखिसर्वस्व-धरस्य**। शिखिनां सर्वस्वं पिच्छानि धरति- बिभर्तीति स तथोक्तस्तस्य मयूरपिच्छधारिण इत्यर्थः । एकस्तावद् **वेणुः**- वंशः । कीदृशः ? **भ्रमरकदम्ब-करवहा** । भ्रमराणां- भृङ्गाणां कदम्बकं- वृन्दं, तस्य रवः- शब्दः, तं हन्ति-जयतीति स तथोक्तः । अतिमधुरत्वाद् भ्रमररुतजेतेत्यर्थः । तथा प्रावृट् कीदृशी ? **कदम्बकरवहा** । कदम्बपुष्पाण्येव करौ- हस्तौ, करं- दण्डं वा वहति-बिभर्तीति सा तथोक्ता । कदम्बपुष्पयुक्तेत्यर्थः ॥३०॥

*अंसादामोदस्य स्थानमवस्रंसि नीपदामोदस्य ।*
*श्रीर्ललितमथो व्रजतः काऽपि बभूवाऽस्य मुष्टिकमथो व्रजतः ॥३१॥*

**काऽपि श्री**रपूर्वा शोभा **बभूव**- आसीत् । कस्य ? **अस्य**- हरेः । कीदृशस्य ? **मुष्टिकमथः** । मुष्टिकं दानवं मथितवान्- हतवान् मुष्टिकमत् तस्य । किं कुर्वतः ? **व्रजतः**- गच्छतः । कथम् ? **ललितं**- सविलासम् । कस्माद् व्रजतः ? **गोकुलात्** । **अथो**ऽनन्तरं, किं कृत्वा व्रजतः ? **उदस्य**- उत्क्षिप्योर्ध्वीकृत्य । किं तत् ? **नीपदाम**- कदम्बपुष्पमालाम् । कीदृशम् ? **स्थानम्**- आश्रयः । कस्य ? **आमोदस्य**- गन्धस्य । तथा **अवस्रंसि**- अधः-पाति । कस्माद् ? **अंसात्**- स्कन्धात् ॥३१॥

*धृतकामधुरैर्मधुरैर्भ्रमरेभ्यो मुदितबल्लवकुलैर्बकुलैः ।*
*क्षतकेशिशिराः शिशिराः*
*स्थलीर्युताः प्रायशो(प्राप सो)-ऽस्तसुरभीः सुरभीः ॥३२॥*

**स**- विष्णुः **प्राप**- प्राप्तवान् । काः ? **स्थलीः**- स्थलानि । कीदृशः ? **अस्तसुरभीः** । अस्ता- क्षिप्ता- अपनीता सुराणां- देवानामसुरेभ्यो

भीः- भयं येन स तथोक्तः । तथा **क्षतकेशिशिराः** । क्षतं- विनाशितं केशिशिरो- दानवकेशिमस्तकं येन स तथोक्तः । कीदृशीः स्थलीः ? **शिशिराः**- शीतलाः । तथा **सुरभीः**- शोभनगन्धाः । तथा **युता**- युक्ताः । कैः ? **बकुलैः**- बकुलपुष्पैः । कीदृशैः ? **धृतकामधुरैः** । धृता कामस्य धुरा- धूर्भारो यैस्तानि तैः । अनङ्गवर्धकैरित्यर्थः । तथा **मधुरैः** । मधु- पुष्परसं रान्ति- ददतीति मधुराणि तैः । केभ्यः ? **भ्रमरेभ्यः**- भृङ्गेभ्यः । तथा **मुदितबल्लवकुलैः** । मुदितानि- हृष्टानि बल्लवानां- गोपानां कुलानि- वृन्दानि येषु तानि तथोक्तानि तैः । विकसितबकुलदर्शनाद् बल्लवसङ्घातो हृष्ट इत्यर्थः ॥३२॥

